**दुण्डुका** त्रि० दुण्डुभ इव कायति कै–क पृषो० भलोपः। दुष्टचित्ते शब्दार्थकल्पतरुः।

**दुण्डुभ** पुंस्त्री० दुण्डुभ+पृषो०। (ढोंडा) सर्पभेदे अमरः। "शरमीनां महारौद्रां प्राणशक्त्या स्थितिदुण्डुभाम्। मज्जामांसमहापङ्कां कवचावर्जितोडुपाम्" भा० द्रो० १५६अ०।

**दुण्डुभि** पु० दुन्दुभि+पृषो०। दुन्दुभिशब्दार्थे "दुण्डुभेर्मूषिकाणां च कीटानां कल्प एव च" इति सूत्रस्थाने प्रतिज्ञाय सुश्रुतेन कल्पस्थाने दुन्दुभिस्वनीयाध्याय उक्तः अतस्तयोरेकार्थता।

**दुत** त्रि० दु उपतापे क्त। पीडिते "मृदुतया दुतया" माघः। दूनतौ इत्यस्य तु "दुग्वोर्दीर्घश्च" पा० नत्वे दीर्घश्च दून इत्येव सि०कौ०।

**दुत्थोत्थदवीय** पु० नील० ताजकोक्ते वर्षप्रवेशे योगभेदे "वीर्योनितौ कार्यविलग्ननाथौ स्वर्क्षादिकेनान्यतरोयुनक्ति। अन्यौ यदा द्वौ बलिनौ तदान्यस्त्यायतो वीर्यं सृजन्ति सन्तः" तल्लक्षणम्।

**दुदु** पु० पर्वतभेदे। "शृङ्गवान् मन्दरो नीलो निषधो दुर्दुदस्तथा" भा० अनु० १६५अ०। दर्दुरस्तथा इत्येव पाठः साधुः

**दुदुह** पु० अनुवंश्ये नृपभेदे। "अनोस्तु पुत्रो धर्मोऽमूद्धृतस्तस्यात्मजोऽभवत्। धृतात्तु दुदुहो जज्ञे प्रचेतास्तस्य चात्मजः" हरिवं० ३२अ०

**दुद्रुम** पु० दुष्टो द्रुमः प्रा०स०। हरित्पर्णे पलाण्डौ अमरः।

**दुध** हिंसने प्रेरणे च भ्वा०पर०सक०सेट्। दोधति अदोधीत् दुदोध दुधितम् "नेयत्तमो दुधितं रोचत" ऋ० ४।१।१७ "दुधिः प्रेरणकर्मा" भा०।

**दुधि** त्रि० दुधिर्हिंसाकर्मेति भाष्योक्तेः दुध–हिंसायां कि। १हिंसके "सूम गमे दुधयेऽर्क! ते" ऋ० ६।२६।२ "दुधये हिंसकाय" भा० उपचारात् २दुर्धरे च "दुधेर्युक्तस्य द्रवतः सहानसा" ऋ० १०।१०२।६ दुधेर्दुर्धरस्य" भा०

**दुध्र** त्रि० दुध–बा० रक् दुष्टं वा धारयति धृ–मूलक पृषो०। १हिंसके २प्रेरके ३दुर्धरे ४दुर्द्धर्षे ५दुष्टानां व्यवस्थापके च। "दुध्र आभूषु रामयन्नि दामनि" ऋ० १।५६।३ "दुध्रः दुष्टानां धर्त्ता व्यवस्थापयिता वा" भा० "दुध्रकृतो मरुतो भ्राजदृष्टयः" ऋ० १।६४।११ "दुध्रकृत् दुध्रं दुष्टं नान्यैर्दुर्द्धर्षं वा आत्मना" भा० "विद्धये दुध्रवाचः" ऋ० ७।२१।२ "दुध्रवाचः दुर्द्धरवाचः" भा०। [शब्दर०।

**दुन्दम** पु० दुन्द इत्यव्यक्तं भणति भण–ड। दुन्दुभिवाद्ये

**दुन्दु** पु० १वसुदेवे त्रिका० २दुन्दुभिवाद्ये शब्दरत्ना०।

**दुन्दुभ** पु० दुन्दु इत्यव्यक्तं शब्दं भणति भण–ड। दुन्दुभिवाद्ये शब्दर०। दुन्दुम इति पाठान्तरम्।

**दुन्दुभि** पु० दुन्दु इत्यव्यक्तशब्देनोभति पूरयति उभ–पूरणे कि शक०। दक्काढक्कायाम् अमरः। "दुन्दुभे! त्वं सपत्नानां घोषाद् हृदयकम्पनः" दुन्दुभिपूजामन्त्रः "विजयदुन्दुभितामयुरर्णवाः" रघुः "दुन्दुभिश्च तदा देवैस्ताडितो देवकिङ्करैः" भा० अनु० २६स्लो०। १वरुणे २दैत्यभेदे मेदि० ३राक्षसभेदे पु०शब्दर० ४विषे हेमच० ५पाशके स्त्री अमरः स्वर्णरूप्याद्रिमये चतुःपार्श्वे विन्दुयुक्ते द्यूतोपकरणे (पाशटी)ख्याते ६पदार्थे स्त्री ७गन्धर्वीभेदे स्त्री वा ङीप्। "तेषां समक्षं गन्धर्वीं दुन्दुभीं नाम नामतः। शशास वरदो देवो गच्छ कार्यार्थसिद्धये। पितामहवचः श्रुत्वा गन्धर्वी दुन्दुभी ततः। मन्थरा मानुषे लोके कुब्जानामाभवत्तदा" भा० व० २७५ अ० दुन्दुभिर्नामासुरभेदश्च मायाविनामासुरपिता तत्कथा रामा० कि० ९सर्गे "मायावी नाम तेजस्वी पूर्वजो दुन्दुभेः सुतः। तेन तस्य महद्वैरं बालिनः स्त्रीकृतं पुरा" "यदा तु दुन्दुभिं नाम दानवं महिषाकृतिम्। प्रतिकालयते बाली मलयं प्रतिपर्वतम्। तदा विवेश महिषो मलयस्य गुहां प्रति। विवेश बाली तत्रापि मलयं तज्जिघांसया" रामा० कि० ४६ अ० ४स्लो०। "दुन्दुभिं नामेति चात्र दुन्दुभिशब्देन तत्पुत्रो मायाविनामा दानव उच्यते तद्वृत्तान्तस्यैवाग्रे वक्ष्यमाणत्वात् "मायावी नाम तेजस्वी दुन्दुभेः पूर्वजः सुतः" इति प्रोक्तेस्तस्य तत् पुत्रत्वं पितुर्महिषाकारत्वात् तत्पुत्रस्य तदाकारत्वमिति च बोध्यम्" तट्टीका

**दुन्दुभिक** पु० कीटभेदे कीटशब्दे दृश्यम्।

**दुन्दुभिनिर्ह्राद** पु० दुन्दुभेरिव निर्ह्रादोऽस्य। दानवभेदे स्कान्दपु०। [नृपभेदे।

**दुन्दुभिषेण** पु० दुन्दुभिः सेनायां यस्य सुषामा० षत्वम्।

**दुन्दुभिस्वन** पु० ६त०। १दुन्दुभिशब्दे दुन्दुभेर्वाद्यभेदस्य स्वनो यत्र विषचिकित्सायाम्। सुश्रुतोक्ते विषचिकित्साभेदे "अथातो दुन्दुभिस्वनीयमध्यायं व्याख्यास्यामः धवाश्वकर्णतिनिशपलाशपिचुमर्दपाटलिपारिभद्रकाम्रोडुम्बरकरहाटकार्जुनककुभसर्जकपीतनश्लेष्मातकाङ्कोठामलकप्रग्रहकुटजशमीकपित्थाश्मन्तकार्कचिरविल्वमहावृक्षारुष्करारालुमधुकमधुशिग्रुशाकगोजीवामूर्वातिल्वकेक्षुरकगोपघण्टारिमेदानां भस्मान्याहृत्य गवां मूत्रेण क्षारकल्पेन परि-